श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुर्दशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्दशः सर्गः ॥

## श्रीरामस्याजेयतां प्रतिपाद्य विभीषणेन रावणं प्रति सीताया रामपार्श्वे प्रेषणायैव सम्मतिदानम्

निशाचरेन्द्रस्य निशम्य वाक्यं
स कुम्भकर्णस्य च गर्जितानि।
विभीषणो राक्षसराजमुख्य -
मुवाच वाक्यं हितमर्थयुक्तम् ॥ **6.14.1** ॥

वृतो हि बाह्वन्तरभोगराशि -
श्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः।
पञ्चाङ्गुलीपञ्चशिरोऽतिकायः
सीतामहाहिस्तव केन राजन् ॥ **6.14.2** ॥

यावन्न लङ्कां समभिद्रवन्ति
बलीमुखाः पर्वतकूटमात्राः।
दंष्ट्रायुधाश्चैव नखायुधाश्च
प्रदीयतां दाशरथाय मैथिली ॥ **6.14.3** ॥

यावन्न गृह्णन्ति शिरांसि बाणा
रामेरिता राक्षसपुङ्गवानाम्।
वज्रोपमा वायुसमानवेगाः
प्रदीयतां दाशरथाय मैथिली ॥ **6.14.4** ॥

न कुम्भकर्णेन्द्रजितौ च राजं -
    स्तथा महापार्श्वमहोदरौ वा।
निकुम्भकुम्भौ च तथातिकायः
    स्थातुं समर्था युधि राघवस्य॥ **6.14.5**॥

जीवंस्तु रामस्य न मोक्ष्यसे त्वं
    गुप्तः सवित्राप्यथवा मरुद्भिः।
न वासवस्याङ्कगतो न मृत्यो -
    र्नभो न पातालमनुप्रविष्टः॥ **6.14.6**॥

निशम्य वाक्यं तु विभीषणस्य
    ततः प्रहस्तो वचनं बभाषे।
न नो भयं विद्म न दैवतेभ्यो
    न दानवेभ्योऽप्यथवा कदाचित्॥ **6.14.7**॥

न यक्षगन्धर्वमहोरगेभ्यो
    भयं न सङ्ख्ये पतगोरगेभ्यः।
कथं नु रामाद् भविता भयं नो
    नरेन्द्रपुत्रात् समरे कदाचित्॥ **6.14.8**॥

प्रहस्तवाक्यं त्वहितं निशम्य
    विभीषणो राजहितानुकाङ्क्षी।
ततो महार्थं वचनं बभाषे
    धर्मार्थकामेषु निविष्टबुद्धिः॥ **6.14.9**॥

प्रहस्त राजा च महोदरश्च
    त्वं कुम्भकर्णश्च यथार्थजातम्।
ब्रवीत रामं प्रति तन्न शक्यं
    यथा गतिः स्वर्गमधर्मबुद्धेः॥ **6.14.10**॥

वधस्तु रामस्य मया त्वया च
    प्रहस्त सर्वैरपि राक्षसैर्वा।
कथं भवेदर्थविशारदस्य
    महार्णवं तर्तुमिवाप्लवस्य ॥ **6.14.11** ॥

धर्मप्रधानस्य महारथस्य
    इक्ष्वाकुवंशप्रभवस्य राज्ञः।
पुरोऽस्य देवाश्च तथाविधस्य
    कृत्येषु शक्तस्य भवन्ति मूढाः ॥ **6.14.12** ॥

तीक्ष्णा न तावत् तव कङ्कपत्रा
    दुरासदा राघवविप्रमुक्ताः।
भित्त्वा शरीरं प्रविशन्ति बाणाः
    प्रहस्त तेनैव विकत्थसे त्वम् ॥ **6.14.13** ॥

भित्त्वा न तावत् प्रविशन्ति कायं
    प्राणान्तिकास्तेऽशनितुल्यवेगाः।
शिताः शरा राघवविप्रमुक्ताः
    प्रहस्त तेनैव विकत्थसे त्वम् ॥ **6.14.14** ॥

न रावणो नातिबलस्त्रिशीर्षो
    न कुम्भकर्णस्य सुतो निकुम्भः।
न चेन्द्रजिद् दाशरथिं प्रवोढुं
    त्वं वा रणे शक्रसमं समर्थः ॥ **6.14.15** ॥

देवान्तको वापि नरान्तको वा
    तथातिकायोऽतिरथो महात्मा।
अकम्पनश्चाद्रिसमानसारः
    स्थातुं न शक्ता युधि राघवस्य ॥ **6.14.16** ॥

अयं च राजा व्यसनाभिभूतो
मित्रैरमित्रप्रतिमैर्भवद्भिः।
अन्वास्यते राक्षसनाशनार्थे
तीक्ष्णः प्रकृत्या ह्यसमीक्ष्यकारी ॥ **6.14.17** ॥

अनन्तभोगेन सहस्रमूर्ध्ना
नागेन भीमेन महाबलेन।
बलात् परिक्षिप्तमिमं भवन्तो
राजानमुत्क्षिप्य विमोचयन्तु ॥ **6.14.18** ॥

यावद्धि केशग्रहणात् सुहृद्भिः
समेत्य सर्वैः परिपूर्णकामैः।
निगृह्य राजा परिरक्षितव्यो
भूतैर्यथा भीमबलैर्गृहीतः ॥ **6.14.19** ॥

सुवारिणा राघवसागरेण
प्रच्छाद्यमानस्तरसा भवद्भिः।
युक्तस्त्वयं तारयितुं समेत्य
काकुत्स्थपातालमुखे पतन् सः ॥ **6.14.20** ॥

इदं पुरस्यास्य सराक्षसस्य
राज्ञश्च पथ्यं ससुहृज्जनस्य।
सम्यग्घि वाक्यं स्वमतं ब्रवीमि
नरेन्द्रपुत्राय ददातु मैथिलीम् ॥ **6.14.21** ॥

परस्य वीर्यं स्वबलं च बुद्ध्वा स्थानं क्षयं चैव तथैव वृद्धिम्।
तथा स्वपक्षेऽप्यनुमृश्य बुद्ध्या वदेत् क्षमं स्वामिहितं स मन्त्री ॥ **6.14.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्दशः सर्गः ॥